# Class 11 Sahityik Hindi All Questions Of Sanskrit Digadarshika

## प्रयागः

### अति लघु प्रश्नोत्तर

1. प्रयागस्य ' प्रयागः ' इति नाम कथमभवत्?

उत्तर : ब्राह्मणाः प्रकृष्टयागकरणात् प्रयागस्य 'प्रयागः' इति नाम अभवत् ।

2. प्रयागस्य दुर्गं कः अकारयत् ?

उत्तर : प्रयागस्य दुर्गं मुगलशासक : अकबर : अकारयत् ।

3. प्रयागः कस्मिन् राज्ये वर्तते ?

उत्तर : प्रयाग : उत्तरप्रदेश राज्ये वर्तते ।

4. ऋषेः भरद्वाजस्य आश्रमः कुत्रास्ति ?

उत्तर :ऋषेः भरद्वाजस्य आश्रमः प्रयागे अस्ति

5. कौशाम्बी कस्य राज्यस्य राजधानी आसीत् ?

उत्तर : कौशाम्बी वत्सराज्यस्य राजधानी आसीत्

Gyansindhu Coaching Classes Hindi By Arunesh Sir

6. कस्य राज्यस्य शासकः उदयनः आसीत् ?

उत्तर : वत्सराज्यस्य शासकः उदयनः आसीत् ।

7. सम्राट् अशोकः स्वशिलालेखं कुत्र अकारयत् ?

उत्तर : सम्राट् अशोकः कौशाम्ब्यां स्वशिलालेखम् अकारयत् ।

8. वत्सराज्यस्य उदयनस्य राजधानी का आसीत्?

उत्तर : वत्सराज्यस्य उदयनस्य राजधानी कौशाम्बी आसीत् ।

9. कः प्रयागस्य नाम ' इलाहाबाद ' इत्यकरोत्?

उत्तर : मुगलशासक : अकबर : प्रयागस्य नाम ' इलाहाबाद ' इत्यकरोत् ।

10. श्रीहर्षः कुत्र आगत्य सर्वस्वमेव याचकेभ्यः अददात् ?

उत्तर : हर्ष : प्रयागे आगत्य सर्वस्वमेव याचकेभ्यः अददात् ।

11. भारतीय स्वतन्त्रता आन्दोलनस्य किं नगरं प्रधानकेन्द्रम् आसीत् ?

उत्तर : प्रयागनगरं भारतीय स्वतन्त्रता आन्दोलनस्य प्रधानकेन्द्रम् आसीत् ।

12. प्रयागे कयोः नद्योः सङ्गमः अस्ति ?

उत्तर : प्रयागे गङ्गायमुनयोः नद्योः सङ्गमः अस्ति

13. प्रयागः कासां नदीनां पवित्र सङ्गमे स्थितः अस्ति ?

उत्तर : प्रयाग : गङ्गायमुनासरस्वतीनां पवित्रसङ्गमे स्थितः अस्ति ।

Gyansindhu Coaching Classes Hindi By Arunesh Sir

14.राम : सीतया लक्ष्मणेन च सह कुत्र अगच्छत् ?

उत्तर : राम : सीतया लक्ष्मणेन च सह चित्रकूटम् अगच्छत् ।

15.प्रयागे स्नानार्थिनां महान् सम्मर्दः कदा भवति ?

उत्तर : प्रयागे स्नानार्थिनां महान् सम्मर्द : अमायां , पौर्णमास्यां सङ्क्रान्तौ च भवति ।

16. गङ्गायमुनयोः सङ्गमः कुत्रास्ति ?

उत्तर : गङ्गायमुनयोः सङ्गमः प्रयागेऽस्ति

17.भरद्वाजस्य प्राचीन गुरुकुलः कुत्र आसीत्?

उत्तर : भरद्वाजस्य प्राचीन गुरुकुल : प्रयागे आसीत्।

18.पुरुरवस्य राजधानी का आसीत् ?

उत्तर : पुरुरवस्य राजधानी प्रतिष्ठानपुरं ( झुंसी आधुनिक नाम ) आसीत् ।

Gyansindhu Coaching Classes Hindi By Arun Singh Sir

## हिमालयः

1. हिमालयः भारतस्य कस्यां दिशि वर्तते ?

उत्तर : हिमालयः भारतस्य उत्तरस्यां दिशि वर्तते ।

2. कश्मीरदेशो कस्य उपत्यकायां विद्यमानः अस्ति ? या हिमालयस्य उपत्यकायां कः देशः अस्ति ?

उत्तर : कश्मीरदेशः हिमालयस्य उपत्यकायां विद्यमानः अस्ति ।

3. कः देश : ' भू - स्वर्ग ' इति संज्ञया अभिहितो भवति ?

उत्तर : **कश्मीरदेश : ' भू - स्वर्ग ' इति संज्ञया अभिहितो भवति ।**

4. हिमालयस्य उपत्यकायां के प्रदेशाः सन्ति?

उत्तर **हिमालयस्य उपत्यकायां कश्मीरप्रदेश , किन्नरप्रदेश : कुलूघाटी च इति प्रदेशाः सन्ति ।**

5. हिमालयस्य कानि शिखराणि उन्नततमानि सन्ति ?

उत्तर : **एवरेस्ट- गौरीशङ्करप्रभृतीनि हिमालयस्य शिखराणि जगति उन्नततमानि सन्ति ।**

6. सर्वोच्चपर्वतशिखरस्य किं नाम ?

उत्तर : **सर्वोच्चपर्वतशिखरस्य नाम ' एवरेस्ट ' इति अस्ति ।**

7. भारतवर्षम् शत्रुभ्यः कः रक्षति ? या भारतवर्षस्य उत्तरसीम्नि स्थितः तत्प्रहरीव कः शत्रुभ्य एनं रक्षति

उत्तर : **हिमालय पर्वतस्य : उत्तरस्यां दिशि स्थितः प्रहरीव एनं शत्रुभ्यः रक्षति ।**

8. ओषधयः जनान् केभ्यो रक्षन्ति ?

उत्तर : **ओषधयः जनान् आमयेभ्यो रक्षन्ति ।**

9. कस्य उपत्यकासु सुदीर्घा : वनराजयो विराजन्ते ? या हिमालयस्योपत्यकासु के विराजन्ते ?

उत्तर : **हिमालयस्य उपत्यकासु सुदीर्घा : वनराजयो विराजन्ते ।**

10.कस्य कन्दरासु तपस्यन्तः अनेके ऋषयो मुनयश्च परां सिद्धिं प्राप्तवन्तः ?

11. उत्तर : **हिमालयस्य कन्दरासु तपस्यन्तः ऋषयो मुनयश्च परां सिद्धि प्राप्तवन्तः ।**

Gyansindhu Coaching Classes Hindi By Arunesh Sir

12. भारतस्य उत्तरस्यां दिशि स्थितो गिरिः केन नाम्नाभिधीयते जनैः ?

उत्तर : भारतदेशस्य उत्तरस्यां दिशि स्थितो गिरि हिमालयः इति नाम्नाभिधीयते ।

13. या कस्य देशस्य कस्यां दिशि हिमालयः स्थितोऽस्ति ?

उत्तर : भारतस्य उत्तरस्यां दिशि हिमालयो नाम नगाधिराजः ( पर्वतराजः ) अस्ति ।

14. कस्य शोभा पर्यटकानां हृदयं मोहयति ?

उत्तर : हिमालयस्य शिमला- देहरादून - मसूरी - नैनीताल इत्यादि नगरस्य शोभा पर्यटकानां हृदयं मोहयति ।

15. वैदिकाः ऋषयः कस्य महत्त्वं स्वीकृतवन्तः?

उत्तर : वैदिकाः ऋषयः हिमालयस्य महत्त्वं स्वीकृतवन्तः ।

Gyansindhu Coaching Classes Hindi By Arunesh Sir

16. हिमालये कानि - कानि नगराणि सन्ति ?

उत्तर : हिमालये शिमला- देहरादून - मसूरी - नैनीताल - प्रभृतीनि नगराणि सन्ति ।

17. हिमालयस्य प्रदेशेषु कानि तीर्थस्थानानि सन्ति?

उत्तर : हिमालयस्य प्रदेशेषु ऋषिकेश - वैष्णवदेवी - ज्वाला - देवी - प्रभृतीनि तीर्थस्थानानि सन्ति ।

18. हिमालयस्य उपत्यकायां के प्रदेशाः सन्ति?

उत्तर : हिमालयस्य उपत्यकायां कश्मीरप्रदेशः , किन्नरप्रदेश :, कुलूघाटी च इति - बदरीनाथ - केदारनाथ - पशुपतिनाथ हरिद्वार प्रदेशाः सन्ति ।

# गीतामृतम्

1. **पण्डिताः कान् नानुशोचन्ति ?**

   **उत्तर :** पण्डिताः गतासूनगतासूंश्च न अनुशोचन्ति ।

2. **कः न हन्ति न च हन्यते ?**

   **उत्तर :** आत्मा न हन्ति न च हन्यते ।

3. **पावकः कं न दहति ?**

   **उत्तर :** पावकः आत्मानं न दहति ।

4. **आत्मा अमरः इति कस्योपदेशः अस्ति ?**

   **उत्तर :** आत्मा अमरः इति गीतायां श्रीकृष्णस्य उपदेशः अस्ति ।

5. **पण्डितः कः ?**

   **उत्तर :** यः गतासूनगतासूंश्च न अनुशोचति सः पण्डितः ।

6. **स कः यं न शस्त्राणि छिन्दन्ति , न पावकः दहति ? या शस्त्राणि कं न छिन्दन्ति ?**

   **उत्तर :** आत्मानं न शस्त्राणि छिन्दन्ति , न पावकः दहति ।

7. **सुखिनः क्षत्रियाः किं लभन्ते ?**

   **उत्तर :** सुखिनः क्षत्रिया : अपावृतं स्वर्गद्वारमिव युद्धं लभन्ते ।

Gyansindhu Coaching Classes Hindi By Arunesh Sir

# सदाचारोपदेशः

1. कः शतं वर्षाणि जीवति ?

उत्तर : सदाचारवान् नरः शतं वर्षाणि जीवति ।

2. मनुष्यः आचारात् किं किं लभते ?

उत्तर : मनुष्य : आचारात् आयुः श्रियं कीर्तिं च लभते।

3. धर्म : केन रक्ष्यते ?

उत्तर : धर्म : सत्येन रक्ष्यते ।

4. विद्या केन रक्ष्यते ?

उत्तर : विद्या योगेन रक्ष्यते ।

5. रूपं केन रक्ष्यते ?

उत्तर : रूपं मृजयेन रक्ष्यते ।

6. कुलं केन रक्ष्यते ?

उत्तर : कुलं वृत्तेन ( सदाचारेण ) रक्ष्यते ।

7. धर्मस्य कः सारः अस्ति ?

उत्तर : ' आत्मनः प्रतिकूलानि परेषां न समाचरेत् ' इति धर्मस्य सारः अस्ति ।

Gyansindhu Coaching Classes Hindi By Arunesh Sir

8. नरः ब्राह्मे मुहूर्ते उत्थाय किं कुर्यात् ?

उत्तर : नरः ब्राह्मे मुहूर्ते उत्थाय धर्मम् अनुचिन्तयेत् ।

9. अभिवादनशीलस्य कानि वर्द्धन्ते ? या कस्य आयुर्विद्यायशोबलं वर्द्धन्ते ?

उत्तर : अभिवादनशीलस्य आयुर्विद्यायशोबलमिति चत्वारि वर्द्धन्ते ।

10.अहं वाचा कीदृशं वदामि ?

उत्तर : अहं वाचा मधुमत् वदामि ।

11. केभ्यः कारणेभ्य : आयुः क्षीयते या के जनाः गतायुषः भवन्ति ?

उत्तर : नास्तिकाः,निष्क्रियाः,गुरुशास्त्रातिलङ्घिनः, अधर्मज्ञाः , दुराचाराश्च गतायुषः भवन्ति ।

12. धर्मस्य सर्वस्वं किमस्ति ?

उत्तर : धर्मस्य सर्वस्वम् अस्ति यत् यः आत्मनः प्रतिकूलानि तस्य परेषां न समाचरेत् ।

13.विनयः किं हन्ति ?

उत्तर : विनय : अकीर्तिं हन्ति ।

14.का क्रोधं हन्ति ?

उत्तर : क्षमाशीलता क्रोधं हन्ति ।

15.यत्नेन किं संरक्षेत् ?

उत्तर : यत्नेन वृत्तं संरक्षेत् ।

Gyansindhu Coaching Classes Hindi By Arunesh Sir

# चरैवेति – चरैवेति

1. आचार्यः कान् अनुशास्ति ? या कः छात्रान् अनुशास्ति ?

   उत्तर : आचार्य : छात्रान् अनुशास्ति ।

2. आचार्यः छात्रान् कदा अनुशास्ति ?

   उत्तर : आचार्य : छात्रान् वेदाध्ययनोपरान्ते अनुशास्ति ।

3. कीदृशं वद ?

   उत्तर : सत्यं वद ।

4. कं चर ?

   उत्तर : धर्मं चर ।

5. कस्मात मा प्रमाद ?

   उत्तर : स्वध्यायात् मा प्रमदः ।

6. आचार्याय प्रियं किमाहृत्य किं मा व्यवच्छेत्सीः ?

   उत्तर : आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः ।

7. कस्मात् - कस्मात् न प्रमदितव्यम् ?

   उत्तर : सत्यात् , धर्मात् , कुशलात् , भृत्यात् वा प्रमदितव्यम् ।

Gyansindhu Coaching Classes Hindi By Arunesh Sir

8. काभ्यां न प्रमदितव्यम् ?

उत्तर : स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।

9. के के देवाः भवन्ति ?

उत्तर : मातृदेवाः पितृदेवा : आचार्यदेवा : अतिथिदेवाः च भवन्ति ।

10. कानि कर्माणि तानि उपास्यानि ?

उत्तर : यान्यनवद्यानि कर्माणि तानि उपास्यानि ।

11. ' यान्यास्माकं सुचरितानि तानि त्वयोपास्यानि ' इति कः कं प्रति वदति ?

उत्तर : ' यान्यास्माकं सुचरितानि तानि त्वयोपास्यानि ' इति आचार्य : छात्रं प्रति वदति ।

12. श्रद्धया देयम् । अद्धयाऽदेयम् । ' इति कः वदति ?

उत्तर : ' श्रद्धया देयम् । अश्रद्धयाऽदेयम् । ' इति आचार्यः वदति ।

13. श्रिया , ह्रिया , भिया , संविदा वा किं कर्त्तव्यम् ?

उत्तर : श्रिया , ह्रिया , भिया , संविदा वा किं ' देयम् ' इति कर्त्तव्यम् ।

14. के धर्मकामाः स्युः ?

उत्तर : अलूक्षा धर्मकामाः स्युः ।

Gyansindhu Coaching Classes Hindi By Arunesh Sir

# विश्ववन्द्याः कवयः

1. विश्ववन्द्याः कवयः के के सन्ति ?

   उत्तर : वाल्मीकिः , व्यासः , कालिदासः च विश्ववन्द्याः कवयः सन्ति ।

2. रामायणग्रन्थं कः अरचयत् ?

   उत्तर : रामायणग्रन्थं वाल्मीकिः अरचयत् ।

3. कालिदास - सूक्तीनां का विशेषता अस्ति?

   उत्तर : मधुरता - सान्द्रता च कालिदास -सूक्तीनां विशेषता अस्ति ।

4. कवीनां गणनाप्रसङ्गे कालिदासः कुत्राधिष्ठितः आसीत् ?

   उत्तर : कवीनां गणनाप्रसङ्गे कालिदासः कनिष्ठिकाम् अधिष्ठितः आसीत् ।

5. भारततैलपूर्णः ज्ञानमयः प्रदीपः केन प्रज्वालितः ?

   उत्तर : भारततैलपूर्ण : ज्ञानमयः प्रदीप : वेदव्यासेन प्रज्वालितः ।

6. अनामिका कथं सार्थवती बभूव ?

   उत्तर : कालिदासस्य समानः कः अपि कविः न अस्ति , अतः अनामिका सार्थवती बभूव।

7. वाल्मीकिः कः आसीत् ?

   उत्तर : वाल्मीकि रामायणग्रन्थस्य रचयिता महाकविः आसीत् ।

Gyansindhu Coaching Classes Hindi By Arunesh Sir

8. कालिदासः कथं प्रसिद्धः अस्ति ?

उत्तर : कालिदासः स्वमधुरसूक्तिभिः प्रसिद्धः अस्ति ।

9. संस्कृतस्य साहित्यस्य आदिकविः कः अस्ति?

उत्तर : संस्कृतस्य साहित्यस्य आदिकवि : वाल्मीकिः अस्ति ।

10.वेदव्यासः कः ज्ञानमयः प्रदीपः प्रज्वालयामास ? या ज्ञानमयः प्रदीपः केन प्रज्वालितः ?

उत्तर : वेदव्यासः महाभारतनामकः ज्ञानमयः प्रदीप प्रज्वालयामास ।

11. व्यासस्य पूर्णं नाम किम् आसीत् ?

उत्तर : व्यासस्य पूर्णं नाम ' कृष्णद्वैपायनः ' आसीत् ।

12. व्यासः किं रचितवान् ?

उत्तर : व्यास : महाभारत नाम ग्रन्थं रचितवान् ।

13. कोविदाः काम् कथां चित्वन्ति ?

उत्तर : कोविदाः रामायणीं कथां चकोरा इव चन्द्रिकमिव चित्वन्ति ।

14. कः कविः कवीन्दुः इति कथितः ?

उत्तर : वाल्मीकिः कविः कवीन्दुः इति कथितः ।

15. कः कविः महाभारतं रचितवान ?

उत्तर : व्यासः कविः महाभारतं रचितवान ।

Gyansindhu Coaching Classes Hindi By Arunesh Sir

# सुभाषचन्द्रः

1. सुभाषस्य जन्मः कुत्र अभवत् ?

उत्तर : सुभाषस्य जन्म : बङ्गप्रान्ते अभवत्।

2. कारागाराद् बहिरागत्य वेषपरिवर्तनं विधाय सुभाषचन्द्रः कुत्र अगच्छत् ?

उत्तर : कारागाराद् बहिरागत्य सुभाष : वेषपरिवर्तनं विधाय पुरुषपुर नगरमगच्छत्।

3. सुभाषस्य सङ्घटनस्य किं नाम आसीत् ?

उत्तर : सुभाषस्य सङ्घटनस्य ' आजाद हिन्द फौज ' इति नाम आसीत् ।

4. सुभाषचन्द्रस्य रोमाञ्चकराः शब्दाः के आसन् ? या सुभाषचन्द्रस्य कः रोमाञ्चकरः शब्दसमूहः आसीत् ?

उत्तर : ' यूयं मह्यं रक्तमर्पयत् अहं युष्मभ्यं स्वतन्त्रतां दास्यामि ' इति सुभाषचन्द्रस्य रोमाञ्चकराः शब्दाः आसन् ।

Gyansindhu Coaching Classes Hindi By Arunesh Sir

5. पुरुषपुरनगरे सुभाषः कस्य गेहे अवसत् ?

उत्तर : पुरुषपुरनगरे सुभाष : उत्तमचन्द्रनाम्नः वणिजो गेहे अवसत् ।

6. सुभाषस्य पितुः नाम किम् आसीत् ?

उत्तर : सुभाषस्य पितुः नाम जानकीनाथबसुः आसीत् ।

7. सुभाषस्य सङ्घटनस्य उद्घोषः कः आसीत्?

उत्तर : सुभाषस्य सङ्घटनस्य उद्घोष : ' दिल्लीं चलत ' इति आसीत् ।

8. सुभाषचन्द्रः केन नाम्ना जर्मनदेशं गतः ?

उत्तर : सुभाषचन्द्र : ' जियाउद्दीन ' इति नाम्ना जर्मनदेशं गतः ।

Gyansindhu Coaching Classes Hindi By Arunesh Sir

9. सुभाषः कां नीतिम् अन्वसरत् ?

उत्तर : सुभाष : ' शठे शाठ्यं समाचरेत् ' इति नीतिम् अन्वसरत् ।

10. सुभाषचन्द्रः कां सेनां सङ्घटितवान् ?

उत्तर : सुभाषचन्द्र : मलयदेशे ' आजाद हिन्द फौज ' इत्याख्यां सेनां सङ्घटितवान्।

11. आजाद हिन्द फौजस्य अभिवादनपदं किम् आसीत् ? या सुभाषस्य सङ्घटनस्य अभिवादनपदं किम् आसीत् ?

उत्तर : आजाद हिन्द फौजस्य ( सुभाष सङ्घटनस्य ) अभिवादनपदं ' जयहिन्द ' इत्यासीत् ।

12. ' दिल्लीं चलत , दिल्ली नातिदूरे वर्तते ' इति कस्य कथनमस्ति ?

उत्तर : ' दिल्ली चलत , दिल्ली नातिदूरे वर्तते ' इति सुभाषस्य कथनम् अस्ति ।

13. सुभाषः कस्य पुत्रः आसीत् ?

उत्तर : सुभाष : जानकीनाथ वसोः पुत्रः आसीत्।

14. सुभाषचन्द्रः कस्या नगर्यां शिक्षा प्राप्तवान्?

उत्तर : सुभाषचन्द्रः कलिकातानगर्यां शिक्षा प्राप्तवान् ।

Gyansindhu Coaching Classes Hindi By Arunesh Sir